"अथाभ्यषिच्यत क्षिप्रं विप्रैरेव यशस्करः।
क्ष्माधृतिः प्रौढ़सामर्थ्यः सानुमानिव तोयदैः॥"

क्ष्मापः, पुं, ( क्ष्मां पाति रक्षतीति। क्ष्मा+पा+कः। ) राजा। यथा,—
"क्ष्मामयार्त्तिरिपुत्रासक्षुदाद्यै रुपवेलतान्।
लब्धोदया श्रीभयेन क्ष्मापा मन्वनुयायिनः॥"
इति राजतरङ्गिण्याम्। ५। ३१८॥

क्ष्मापालः, पुं, ( क्ष्मां पालयतीति। क्ष्मा+पाल्+णिच्+अण्। क्ष्मायाः पालो वा। ) राजा। यथा, राजतरङ्गिण्याम्। ५। ३२४।
"न के लोभं समुत्पाद्य जिह्वया स्निग्धदीर्घया।
पिपीलिका इव यस्ताः क्ष्मापालैः शल्यकैरिव॥"

क्ष्माभुक् [ज्,] पुं, ( क्ष्मां पृथ्वीं भुनक्ति उपभुनक्ति इत्यर्थः। क्ष्मा+भुज्+क्विप्। कुत्वं च। ) राजा। इत्यमरः। २। ८। १॥ (यथा, राजतरङ्गिण्याम्। ५। ५५।
"तत्रस्थाः क्ष्माभुजा दृष्टास्तन्निवेदनकारणम्।
अविज्ञपन् क्षितिन्यस्तजानुप्राञ्जलयस्ततः॥")

क्ष्माभृत्, पुं, ( क्ष्मां पृथ्वीं बिभर्त्ति। क्ष्मा+भृ+क्विप् तुगागमश्च। ) राजा। (यथा, पञ्चतन्त्रे। १। १६६।
"देवानामुपरि क्ष्माभृदातुराणां चिकित्सकाः।
वणिजो ग्राहकाणाञ्च मूर्खाणामपि पण्डिताः॥")
पर्व्वतः। इत्यमरः। २। ३। १॥ (यथा, राजेन्द्रकर्णपूरे। ६७।
"कान्तारेषु च काननेषु च सरित्तीरेषु च
क्ष्माभृता-
मुत्सङ्गेषु च पत्तनेषु च सरिद्भर्त्तुस्तटान्तेषु च॥")

क्ष्माय, ई ङ विधूनने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) षवर्गशेषयुक्तः। क्षादिः। विधूननमिति विधूयतेऽस्मान्निति कर्म्मणि घञि विधूनः सकम्पः ततो विधून इवाचरतीति क्वौ कृते अनटि रूपम्। कम्पनमित्यर्थः। ई, क्ष्मातः। ङ, क्ष्मायते वृक्षः। (तथाच, भट्टिः। १४। २१।
"उल्का ददृशिरे दीप्ता रुरुवुश्चाशिवं शिवाः।
चक्ष्माये च मही रामः शश्रङ्के चाशुभागमम्॥")
क्ष्मायते कम्पते त्वङ्गत्युच्चतीर्त्ते च वेपते इति कम्पार्थे भट्टमल्लोऽपि। रमानाथस्तु विधूननशब्दस्येणन्ताद्व्युत्पत्तेः सकर्म्मकोऽयं इति प्रतीमः। प्रयोगस्त्वन्यथा दृश्यते इत्याह। इति दुर्गादासः॥

क्ष्मायितः, त्रि, ( क्ष्माय+इतच्। ) कम्पितः। इति व्याकरणम्॥

क्ष्मायिता, [ऋ] त्रि, ( क्ष्माय+तृच्प्रत्ययः। ) कम्पकः। इति व्याकरणम्॥

क्ष्मील, निमेषे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्। ) निमेषः पक्ष्मभिश्चक्षुष आवरणम्। क्ष्मीलति चक्षुः पक्ष्मभिरावृतं स्यादित्यर्थः। इति दुर्गादासः॥

क्ष्विड़, ऌ आ ङ ञि स्नेहे। मोचे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-मोचे सकं-सेट्।) वकारयुक्तः। ऌ, अक्ष्विड़त्। आ, क्ष्विड़ितं क्ष्विड्डं तेन। ङ, क्ष्वेड़ते। ञि, क्ष्विड्डोऽस्ति। स्नेहः स्निग्धीभावः। मोचे क्ष्वेड़ते तिलः तैलं मुञ्चतीत्यर्थः। इति दुर्गादासः॥

क्ष्विण्णः, त्रि, ( क्ष्विद्+क्तः। ) मुक्तः। स्निग्धः। इति व्याकरणम्॥

क्ष्विद, आ ञि कूजने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्। ) आ, क्ष्वेदितं क्ष्विण्णं तेन। ञि, क्ष्विण्णोऽस्ति। मूर्द्धन्यवर्गतृतीयान्तोऽयमित्येके। इति दुर्गादासः॥

क्ष्विद, इर् य आ मोचे। स्नेहे। इति कविकल्पद्रुमः॥ ( दिवां-परं-अकं-मोचे तु सकं-सेट्। ) इर्, अक्ष्विदत् अक्ष्वेदीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। य, क्ष्विद्यति। आ, क्ष्वेदितं क्ष्विण्णं तेन। इति दुर्गादासः॥

क्ष्विद, ऌ आ ङ ञि मोचे। स्नेहे। इति कविकल्पद्रुमः॥ ( भ्वां-आत्मं-सकं-स्नेहे तु अकं-सेट्। ) एतदाद्यास्त्रयो वकारयुक्ताः क्षाद्याः। ऌ, अक्ष्विदत्। आ, क्ष्वेदितं क्ष्विण्णं तेन। ङ, क्ष्वेदते तिलः तैलं मुञ्चतीत्यर्थः। ञि, क्ष्विण्णोऽस्ति। स्नेहः स्निग्धीभावः। इति दुर्गादासः॥

क्ष्वेड़ं, क्ली, ( क्ष्विड़+घञ्। ) लोहितार्कपर्णफलम्। घोषापुष्पम्। इति मेदिनी। ड़े। ६॥

क्ष्वेड़ः, पुं, ( क्ष्विड़+भावादौ घञ्। क्ष्वेड़ते इति अच् वा।) ध्वनिः। कर्णामयः। विषम्। इति मेदिनी। ड़े। ५॥ (यथा, आनन्दलहर्य्याम्। २८।
"करालं यत् क्ष्वेड़ं कवलितवतः कालकलना
न शम्भोस्तन्मूलं जननि तव ताड़ङ्कमहिमा॥")
पीतघोषावृक्षः। इति रत्नमाला॥ * ॥ क्ष्वेड़रोगस्य निदानादि कर्णरोगशब्दे द्रष्टव्यम्॥

क्ष्वेड़ः, त्रि, ( क्ष्विड़+कर्म्मणि घञ्। ) दुरासदः। कुटिलः। इति मेदिनी। ड़े। ६॥

क्ष्वेड़नं, क्ली, ( क्ष्विड़+भावे ल्युट्। ) मोचनम्। त्यागः। यथा, महाभारते। ३। १७८। २६।
"त्रासनं सर्व्वभूतानां कालान्तकयमोपमम्।
निश्वासक्ष्वेड़नादेव भर्त्सयन्तमिव स्थितम्॥"

क्ष्वेड़ा, स्त्री, ( क्ष्विड़+घञ्+टाप् च। ) वंशशलाका। सिंहनादः। इति मेदिनी। ड़े। ५॥ (स तु लोकस्य शब्दविशेषः। यथा, वक्रोक्तिपञ्चाशिकायाम्। २६।
"एषा सागरसङ्गताभिमतता याता न मे कर्हिचित्
मुग्धे कण्ठभुवं ब्रवीषि मम किं सक्ष्वेड़तामीयुषीम्।
क्ष्वेड़ाराव इहोषितस्तव गणव्रातैः सह क्रीड़तो
युष्मान्नीलगलोऽवसादिति गिरा गौर्य्या हृतोऽव्युत्तरः॥"
"सागरसङ्गतेति। सागरेण समुद्रेण सङ्गता। अर्थाद्गङ्गा। उत्तरे तु सेति सर्व्वनामपदम्। गरो विषम्। तदाह सक्ष्वेड़ेति। क्ष्वेड़ेन विषेण क्ष्वेड़या शब्दविशेषेण च सक्ष्वेड़म्। क्ष्वेड़ं विषम्। क्ष्वेड़ा जनस्य शब्दविशेषः॥" इति तट्टीका॥)
कोषातकी। इति राजनिर्घण्टः॥

क्ष्वेड़ितं, क्ली, (क्ष्विड़्+भावे क्तः।) सिंहनादः। इत्यमरः। ३। ५। ३४॥ ( यथा, महाभारते। १। ६८। ६।
"नानायुधधरैश्चापि नानावेशधरैस्तथा।
हेषितस्वनमिश्रैश्च क्ष्वेड़ितास्फोटितस्वनैः।
आसीत् किलकिलाशब्दस्तस्मिन् गच्छति
पार्थिवे॥" )

क्ष्वेल, ऋ चालगत्योः। इति कविकल्पद्रुमः॥ ( भ्वां-परं-अकं-गतौ तु सकं-सेट्। ) वकारयुक्तः। क्षादिः। ऋ, अचिक्ष्वेलत्। चालः कम्पः। चालः केश्चिन्न मन्यते। इति दुर्गादासः॥ (क्रीड़ायामिति केचित्। यथा, रामायणे। ५। १०। १३।
"आस्फोटननिनादांश्च बालानां क्ष्वेलतां तथा॥")

क्ष्वेलिका, स्त्री, (क्ष्वेला+स्वार्थे कन् अत इत्वञ्च।) क्रीड़ा। यथा, श्रीभागवते। ५। ८। १८।
"क्ष्वेलिकायां मां त्वृषा समाधिना आमीलितदृशं प्रेमसंरम्भेण चकितचकित आगत्य पृषदपरुषविषाणाग्रेण लुठति।" "सम्भवति चेतदित्याह। क्ष्वेलिकायां क्रीड़ायां त्वृषा यः समाधिस्तेनामीलिते दृशौ येन तं मां प्रेमसंरम्भेण प्रणयकोपेन पृषत्जलबिन्दुस्तद्वदपरुषेण विषाणाग्रेण लुठति संघट्टयति।" इति तट्टीकायां श्रीधरस्वामी॥

क्ष्वेली, स्त्री, ( क्ष्वेल+गौरादित्वात् ङीष्। ) क्रीड़ा। यथा, श्रीभागवते। १०। २९। ४६।
"बाहुप्रसारपरिरम्भकरालकोरु-
नीविस्तनालभननर्म्मनखाग्रपातैः।
क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणा-
मुत्तम्भयन् रतिपतिं रमयाञ्चकार॥"
"बाहुप्रसारश्च परिरम्भश्च करालकादीनामालभनं स्पर्शश्च नर्म्म परिहासश्च नखाग्रपातश्च तैः। क्ष्वेल्या क्रीड़या च अवलोकैश्च हसितैश्च कामं तासां उद्दीपयन् ता रमयामास।" इति तट्टीकायां श्रीधरस्वामी॥ * ॥ अत्र क्ष्वेल्यमिति प्रमादात् केनचिल्लिखितम्॥